श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री सौम्यनारायण विरचिता

# ॥ तिरुप्पावैपद्यानां संस्कृतश्लोकाः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तिरुप्पावैपद्यानां संस्कृतश्लोकाः ॥

मासे वै मार्गशीर्षाख्ये मापतेर्महतीं कृपाम्।
प्राप्तुकामाः हि गोप्यस्ताः आचरन्नु व्रतं शुभम्॥ 1 ॥

कृत्यानां चैव करणम् अकृत्यानाञ्च वर्जनम्।
उज्जीवनार्थं षण्मार्गं विधाय व्रतमाचरन्॥ 2 ॥

अतिवृष्ट्यानतिवृष्ट्या ह्यशुभं नैव संभवेत्।
समग्रदेशे गोवृद्धिः धनधान्यमयी भवेत्॥ 3 ॥

मार्गशीर्षव्रतार्थं हि माधवस्य प्रियात्मनाम्।
कालमेघः कृपारूपी वर्षं वर्षयतु स्वयम्॥ 4 ॥

मायिनं मधुरानाथं यामुनेयं महानिधिम्।
स्मृत्वा संपूज्य सङ्कीर्त्य शुद्धा भूत्वाऽऽप्नुयात् शुभम्॥ 5 ॥

तार्क्ष्यध्वजगृहेशस्य शङ्खनादं मुनेर्जपम्।
नाशृणोः किन्नु बाले त्वम् उत्तिष्ठ व्रतमाचर॥ 6 ॥

भरद्वाजरुतं तारं गोपीनां दधिमन्थनम्।
नाशृणोः किञ्च पैशाचे केशवं चैहि कीर्तय॥ 7 ॥

प्रातर्गावः चारयद्भ्यः गोपेभ्यः पूर्वगाः वयम्।
कृष्णतृष्णासमेते त्वं बकारिं चैहि भावय॥ 8 ॥

भागिनेये मातुलानि ! मणिद्वारमपावृणु।
त्वत्सुता बधिरा मूका किमुत्थापय संप्रति ॥ 9 ॥

तुलसीगन्धचूडाङ्गं स्तोतुमायाहि सांप्रतम्।
जितकुम्भश्रुतेर्निद्रां त्यक्त्वा मातः शुभे त्वर ॥ 10 ॥

स्वर्णलते शुभाङ्गे च सखीजनास्तवाङ्गने।
समागतास्समुत्तिष्ठ शीघ्रमायाहि माऽऽलप ॥ 11 ॥

वात्सल्यभरितैर्गोभिः दुग्धैः क्लिन्नधनि स्वसे।
मनोभिरामं मान्यार्थं मा गाः निद्रां त्वर प्रिये ॥ 12 ॥

विहङ्गासुरविध्वंसं कीर्तनाय मितास्त्रियः।
विश्लेषं किं विना निद्रां अकरोः कुड्मलेक्षणे ॥ 13 ॥

बाह्याङ्गनेषु वापीषु कल्हाराः फुल्लतामिताः।
शङ्खचक्रधरं देवं कीर्तय त्वं गताः बुधाः ॥ 14 ॥

कीरके किमु निद्रासि पुरा यामि न निन्द्यताम्।
दुष्टाऽभवं त्वहं तावत् मायिनं मानय त्वर ॥ 15 ॥

नन्दगोपगृहद्वारपाल द्वारमपावृणु।
मणिवर्णसुबोधार्थं मनोद्वारमपावृणु ॥ 16 ॥

वस्त्रपानान्नसंधातः यशोदे नन्दगोप हे।
त्रिविक्रम प्रलंबघ्न निद्रां त्यजत सांप्रतम् ॥ 17 ॥

मत्तवारणघर्षांसवधूनीले सुकेशिनि।
माधवीगुल्मविहगः रौति द्वारमपावृणु ॥ 18 ॥

वाल्लभीपञ्चशयनसुप्तनीलोन्नतस्तने।
भण कज्जलसन्नेत्रि निद्रायाः विरमस्व ते ॥ 19 ॥

देवक्लेशापहारिन् त्वं शौरे शूर विबोधतु।
ताम्राभमृदुवक्षोजे दर्पणैस्तं विबोधय॥ **20** ॥

भूरिभाजनगव्यात्मसुततल्लज जागृहि।
जगज्योते हि शत्रुघ्न त्वत्पादशरणं व्रजे॥ **21** ॥

भग्नाभिमानभूपाभाः वयं त्वां शरणं वृताः।
सोमसूर्यनिभाक्षिन् ते ह्यपाङ्गैर्दुरितं हर॥ **22** ॥

दुर्दिनेषु गुहान्तस्स्थमृगराजनिभप्रभो।
अतसीपुष्पनेत्र त्वं हरि पीठे विराजय॥ **23** ॥

त्रिविक्रम श्रिया लङ्का शकटासुरभञ्जन।
वत्सारे गिरिधारिन् त्वं कृपया रक्ष नो व्रजान्॥ **24** ॥

कस्याश्चिद्गर्भसंभूत कयाचित्पोषित प्रभो।
कंसारे पूजयामस्त्वां त्वया त्राताः शुभैर्वृताः॥ **25** ॥

मणिवर्णिन् महामायिन् ज्येष्ठानां करणं शृणु।
शङ्खवाद्यध्वजादीन्नो वटशायिन् प्रयच्छ तान्॥ **26** ॥

हिताहितमनस्क त्वत्कीर्तने भूषणादिकान्।
धृत्वा क्षीरान्नपानेन संतुष्टाः समितास्सदा॥ **27** ॥

गोचारणेन संतुष्टाः बालिशाः प्राप्य वोऽनघ।
किमन्यत्त्वां विहायास्मदपराधान् क्षमस्व भोः॥ **28** ॥

प्रातस्समेत्य संसेव्य त्वत्पादकमलं गताः।
न जहि स्याम किङ्कर्यः त्वद्भक्ताः सप्तजन्मसु॥ **29** ॥

सुक्षीरार्णवमन्थानमाधवं केशवं विभुम्।
विष्णुचित्तसुतासूक्त्या यो भजेत्स शुभं त्वियात्॥ **30** ॥

## समापनम्

कृष्णाय प्रतिबोधितां भगवतीश्रीगोदया च स्वयम्
आर्येण ग्रथितां सुनाथमुनिना दिव्यप्रबन्धान्तराम्।
वेदान्तामृतवर्षिणीं रसवतीं त्रिंशत्सुपद्यात्मिकां
अम्ब त्वामनुसन्दधामि भवतीं भक्ताघसंहारिणीम्॥

॥ इति श्री तिरुप्पावैपद्यानां संस्कृतश्लोकाः समाप्ताः ॥